# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2018 - ’19

**Class : VI** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्ड: क - अपठित अवबोधनम् - 10
खण्ड: ख - रचनात्मक कार्यम् - 15
खण्ड: ग - अनुप्रयुक्त व्याकरणम् - 25
खण्ड: घ - पठित अवबोधनम् - 30

## खण्ड: क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।**

एक: कच्छप: एक: शशक: च आस्ताम्। एकदा तयो: विवाद: अभवत्। कच्छप: कथयति - अहं शीघ्रं धावामि। शशक: वदति - अहं शीघ्रं धावामि। तदा तयो: प्रतियोगिता अभवत्। शशक: शीघ्रं धावति। स: मार्गे एकं वृक्षं पश्यति। स: तत्र विरामं कृत्वा विश्रामं करोति। कच्छप: मन्दं मन्दं गच्छन् स्वलक्ष्यं प्राप्नोति। विश्रमानन्तरं शशक: तीव्रगत्या लक्ष्यं प्रति धावति। परन्तु स: कच्छपं तत्र प्रथममेव पश्यति। परिश्रमी कच्छप: विजयी अभवत्। अलस: शशक: च पराजित:।

**I. एकपदेन उत्तरत।** **2**

क. कयो: मध्ये विवाद: अभवत्?
ख. मार्गे क: एकं वृक्षं पश्यति?

**II. पूर्णवाक्येन उत्तरत।** **4**

क. विश्रमानन्तरं शशक: किं करोति?
ख. क: विजयी अभवत्?

**III. निर्देशानुसारम् उत्तरत।** **2**

क. वृक्षम् इति पदस्य पर्याय: क:?
(पुष्पम्, तरु:, गज:)
ख. धावति अत्र क: लकार:?
(लृट्, लङ्, लट्)

**IV. अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।** **2**

## खण्डः ख – रचनात्मक कार्यम्

**2. अधोदत्तं चित्रं ध्यानेन पश्यत। चित्रम् आधृत्य प्रदत्त शब्दसूची-सहायतया संस्कृतेन पञ्च वाक्यानि लिखत।** **10**

(पिपासितः, भ्रमति, उद्यानम्, घटं, शिलाखण्डम्, पातयति, आनयति, उपरि, अल्पं जलम्)



**3. चित्रं दृष्ट्वा वाक्यं लिखत।** **5**

क. मत्स्याः किं कुर्वन्ति?



ख. कुक्कुराः किं कुर्वन्ति?



ग. मयूरः किम् करोति?



घ. बालिकाः किं कुर्वन्ति?



ङ. सिंहः किं करोति?



## खण्डः ग - अनुप्रयुक्त व्याकरणम्

**4. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 5

(उच्चैः, कथं, कदा, मा, अपि)

क. गर्वं ---------- कुरु।

ख. त्वं --------- पुरीं गमिष्यसि?

ग. मेघाः ------------ गर्जन्ति।

घ. अहं पठामि, त्वम् --------- पठ।

ङ. तव स्वास्थ्यं ---------- अस्ति?

**5. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत।** 5

क. सुधा ---------- धनम् आनयति। (कोषेण, कोषात्)

ख. मम भगिनी --------- विद्यालये पठति। (नगरम्, नगरस्य)

ग. ---------- मीनाः वसन्ति। (सरोवरात्, सरोवरे)

घ. खगाः ---------- निवसन्ति। (नीडानि, नीडेषु)

ङ. --------- जलं निर्मलम्। (अलकनन्दायाः, अलकनन्दया)

**6. वर्ण विच्छेदं संयोजनं वा कुरुत।** 2

क. अ + स् + म् + आ + क् + अ + म्    ख. निर्गच्छति

ग. त् + ई + र् + त् + व् + आ    घ. उत्तीर्णाः

**7. रिक्तस्थानानि पूरयत।** 5

| | | | |
|---|---|---|---|
| क. | भानवे | ---------- | ---------- |
| ख. | मुनौ | ---------- | ---------- |
| ग. | --------- | ---------- | अतिष्ठाम |
| घ. | --------- | नेष्यथः | ---------- |
| ङ. | चिन्तयानि | ---------- | ---------- |

**8. रेखाङ्कितानां शब्दानां सन्धिं सन्धिविच्छेदं वा लिखत।** 4

क. असतो मा <u>सद्गमय</u>।

ख. <u>कश्चित्</u> पथिकः तत्र आगच्छत्।

ग. <u>तत्रैव</u> अस्य निर्णयः भविष्यति।

घ. पीडितः सः <u>अति+ उच्चैः</u> चीत्करोति।

**9. उचित संख्यापदैः रिक्तस्थानानि पूरयत।** 4

क. क्षेत्रे --------- नारिकेलः वृक्षाः आसन्। (49)

ख. मार्चमासे --------- दिनानि भवन्ति। (31)

ग. वृक्षस्य उपरि -------- खगाः आसन्। (33)

घ.	कक्षायां --------- छात्राः आसन्। (44)

## खण्डः घ – पठित अवबोधनम्

**10. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अजीजः सरलः परिश्रमी च आसीत्। सः स्वामिनः एव सेवायां लीनः आसीत्। एकदा सः गृहं गन्तुम् अवकाशं वाञ्छति। स्वामी चतुरः आसीत्। सः चिन्तयति – अजीजः इव न कोऽपि अन्यः कार्यकुशलः। एषः अवकाशस्य अपि वेतनं ग्रहीष्यति। एवं चिन्तयित्वा स्वामि कथयति – अहं तुभ्यम् अवकाशस्य वेतनस्य च सर्वं धनं दास्यामि। परम् एतदर्थं त्वं वस्तुद्वयमानय अहह! आः! च इति।

**I. एकपदेन उत्तरत।** 2

क. अजीजः कस्य सेवायां लीनः आसीत्?

ख. सः कुत्र गन्तुम् अवकाशं वाञ्छति?

**II. पूर्णवाक्येन उत्तरत।** 1

स्वामी अजीजः किं कथयति?

**III. निर्देशानुसारम् उत्तरत।** 2

क. आसीत् अत्र लकारः कः?
(लट्, लङ्, लृट्)

ख. कोऽपि इत्यस्य पदच्छेदं लिखत।
(कः + अपि, को + अपि, का + अपि)

**11. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत।**

गृहं जीर्णं न वर्षासु वृष्टिं वारयितुं क्षमम्।
तथापि कर्मवीरत्वं कृषिकाणां न नश्यति ॥

**I. एकपदेन उत्तरत।** 2

क. गृहं कीदृशम् अस्ति?

ख. केषां कर्मवीरत्वं न नश्यति?

**II. पूर्णवाक्येन उत्तरत।** 1

कृषिकाणां किम् न नश्यति?

**III. निर्देशानुसारम् उत्तरत।** 2

क. तथापि अत्र पदच्छेदं किम्?
(तथ + अपि, तथा + अपि, तथा + आपि)

ख. भवनम् इत्यस्य अपरं पदं श्लोकात् चित्वा लिखत।
(मन्दिरम्, गृहम्, क्षेत्रम्)

**12. अधोलिखितम् नाट्यांशं पठित्वा उत्तराणि लिखत।**

बद्धपुरुषः – एकस्मिन् दिवसे मया रोहितमत्स्यः खण्डशः कृतः। तस्य उदरस्य अभ्यन्तरे मया इदं रत्नशोभितम् अङ्गुलीयकं प्राप्तम्। अयम् अस्य आगमवृत्तान्तः पश्चात् तस्य विक्रयाय आगतः अहम् आभ्यां गृहीतः। इदं श्रुत्वा मां मारयत वा मुञ्चत वा।

श्यालः – जानुक अस्य शरीरात् मांसस्य गन्धः निःसरति। अतः निःसंशम् अयम्

मत्स्यमारक: एव। परन्तु अस्य अङ्गुलीयकस्य प्राप्ति: विचारणीया राजकुलं गच्छाम:। तत्रैव अस्य निर्णय: भविष्यति।

**I. एकपदेन उत्तरत।** 2

क. रोहितमत्स्य: केन खण्डश: कृत:?

ख. मत्स्यस्य उदरे किं प्राप्तम्?

**II. पूर्णवाक्येन उत्तरत।** 1

कस्य शरीरात् मांसस्य गन्ध: नि:सरति?

**III. भाषिककार्यम्।** 2

क. गद्यांशे 'आकर्ण्य' इति पदस्य समानार्थकं पदं किम् प्रयुक्तम्?

ख. 'इदं श्रुत्वा मां मारयत' अत्र 'माम्' इति पदं कस्मै प्रयुक्तम्?

**13. घटनाक्रमानुसारं लिखत।** 4

क. तदा कश्चित् पथिक: तत्र आगच्छत्।

ख. सर्वे प्रहृष्टा: भूत्वा गृहम् अगच्छन्।

ग. एकदा दश बालका: स्नानाय नदीम् अगच्छन्।

घ. सर्वे बालका: नदीम् उत्तीर्णा:।

ङ. ते निश्चयम् अकुर्वन् यत् दशम: नद्यां मग्न:।

च. पथिक: नायकम् आदिशत् - त्वं बालकान् गणय।

छ. तत: ते तीर्त्वा पारं गता:।

ज. बालक: अवदत् नव एव सन्ति।

**14. कोष्ठकात् उचितपदं चित्वा पूरयत।** 5

(मन्दिरे, भारते, तीर्त्वा, परिश्रमी, कुटुम्बस्य)

क. ते बालका: ----------- नद्या: उत्तीर्णा:।

ख. मत्स्यविक्रयेण ----------- भरणं करोमि।

ग. ---------- बहव: उत्सवा: भवन्ति।

घ. अजीत: ----------- आसीत्।

ङ. जना: ----------- पुष्पाणि अर्पयन्ति।

**15. प्रश्ननिर्माणं कुरुत।** 3

क. <u>सूर्य:</u> तपतु।

ख. <u>दश</u> बालका: स्नानाय नदीम् अगच्छन्।

ग. कुत्रचित् <u>वृद्धा</u> मिलति।

**16. समुचितान् अर्थान् मेलयत।** 3

| | | |
|---|---|---|
| क. | हस्ते | अकस्मात् |
| ख. | सद्य: | पृथ्वीम् |
| ग. | सहसा | गगनम् |
| घ. | धराम् | शीघ्रम् |
| ङ. | धनम् | करे |
| च. | आकाशम् | द्रविणम् |